दिनाङ्कः-08.01.2026

प्रातः - 06:55

## प्रधानमन्त्री नेतन्याहू

प्रधानमन्त्री नरेन्द्र-मोदी इस्राइल-देशस्य प्रधानमन्त्रिणा बेन्यामिन नेतन्याहू वर्येण सह दूरभाषे संवादम् अकरोत्। तेन भारत- इस्राइलदेशयोः रणनीतिक-सहभागिता दृढीकरणाय चर्चा कृता। उभाभ्यां नेतृभ्यां लोकतान्त्रिक-मूल्यानां परस्पर-विश्वासस्य दूरदर्शि-दृष्टिकोणस्य च आधारे भारत-इस्राइल-रणनीतिक-सहभागितां द्रढयितुं प्राथमिकताः अभिज्ञाताः। उभाभ्याम् आतङ्कवादस्य सर्वाणि रूपाणि अभिव्यक्तियश्च कथमपि न सोढुं स्वीयं दृष्टिकोणं पुनः प्रकटितम्। आतङ्कवादं निराकर्तुं च प्रतिबद्धतायाः पुष्टिः कृता। उभाभ्यां नेतृभ्यां परस्परं नव-वर्षस्य शुभकामनाः प्रदत्ताः। देशद्वयस्य नागरिकेभ्यः शान्तेः समृद्धेश्च कामना कृता।

--------

## सकल-देशीय-उत्पादः

वास्तविकः सकल-देशीय-उत्पादः (जी. डी. पी.) पञ्चविंशत्यधिक द्विसहस्र-षड्विंशत्यधिक द्विसहस्र तमे वर्षे चत्वारिदशमलवोत्तर सप्त प्रतिशतं यावत् वृद्धिं प्राप्स्यति इति अनुमानितम् अस्ति, यत् गतवर्षे पञ्चदशमलवोत्तर षट् प्रतिशतम् आसीत्। वर्तमानस्य वित्तवर्षस्य जी. डी. पी. इत्यस्य प्रथम-अग्रिम-अनुमानानुसारम्, वास्तविक-जी. डी. पी. वर्तमान-वित्तवर्षे एकोत्तर-द्विशत लक्ष-कोटिरूप्यकाणां स्तरं प्राप्नुयात् इति अनुमानितम् अस्ति, चतुर्विंशत्यधिक द्विसहस्र-पञ्चविंशत्यधिक द्विसहस्र वर्षे सप्ताशीत्यधिकैकशत लक्ष-कोटिरूप्यकाणां जी. डी. पी. इत्यस्य अस्थायी-अनुमानस्य अपेक्षास्ति। सांख्यिकी-कार्यक्रम-कार्यान्वयन-मन्त्रालयः अवदत् यत्, सेवाक्षेत्रे उत्कृष्टवृद्धिः प्राक्कलितस्य वास्तविकवृद्धेः प्रमुखः चालकः अस्ति इति ज्ञायते।

देशस्य रिफार्म् एक्स्प्रेस्-इत्यस्य गतिः निरन्तरं वर्धमाना अस्ति इति प्रधानमन्त्रिणा नरेन्द्रमोदिना उक्तम्। जी. डी. पी. इत्यस्मिन् प्रतिक्रियारूपेण श्रीमोदी अवदत् यत् एतत् एन्. डी. ए. सर्वकारस्य

व्यापकनिवेशेन, आग्रह-नीतिना च प्रेरितः अस्ति इति। सः अवदत् यत् सर्वकारः समृद्ध-भारतस्य स्वप्नं साकारयितुं कार्यं कुर्वन् अस्ति।

-------

जयशङ्करः

विदेशमन्त्री डा. एस्. जयशङ्करः अवदत् यत् फ़्रान्स्-देशः भारतस्य प्राचीनतमेषु सामरिकसहभागिषु अन्यतमः अस्ति तथा च बहुध्रुवीयतायाः कृते प्रतिबद्धः द्वयोः राष्ट्रयोः अस्मिन् स्तरे वैश्विकराजनीतिः स्थिरीकरणाय संयुक्तरूपेण कार्यं महत्त्वपूर्णम् अस्ति इति। पैरिस-नगरे फ़्रान्स्-देशस्य विदेशमन्त्रिणा जीन्-नोयॅल्-बैरोट् इत्यनेन सह मिलित्वा स्वस्य प्रारम्भिक-भाषणे डा. जयशङ्करः अवदत् यत् निरन्तर-वार्तालापः सम्बन्धं पोषणाय महत्त्वपूर्णः अस्ति।

-------

जे. पी. नड्डाः

भाजपेति-दलस्य राष्ट्रिय-अध्यक्षः जे. पी. नड्डाः अद्य श्वः च द्विदिवसीययात्रायाम् पश्चिमबङ्गालराज्यं गमिष्यति, दलं राज्ये षड्विंशत्यधिक द्विसहस्रतमे वर्षे आगामि विधानसभानिर्वाचनाय सज्जता इतोपि तीव्रतरं करोति। स्वस्य यात्रावधौ, श्रीनड्डा दलस्य पश्चिमवङ्ग-विभागस्य कोर्-समिति-सभायाः आयोजनं करिष्यति तथा च अनेकेभ्यः मण्डल-स्तरीय-दलनेतृभिः सह संवादं करिष्यति। सः भाजपा-चिकित्सक-प्रकोष्ठस्य सदस्यैः सह अपि मेलनं विधास्यति। श्वः, श्रीनड्डा स्वकीयस्य केन्द्रीय मन्त्रालयस्य आधिकारिकसभासु भागं ग्रहीष्यति। सूत्रानुसारं भाजपेति-दलस्य राष्ट्रियकार्यकारी-अध्यक्षः नितिन-नबीनः अपि शीघ्रमेव पश्चिमबङ्गालस्य भ्रमणं करिष्यति इत्यपेक्ष्यते।

---------

तमिलनाडु

तमिलनाडु-राज्ये पी. एम्. के. इति पट्टालि-मक्कल-काची इतीदं दलं तमिल्नाडु-निर्वाचनात् प्राक् राज्यस्य राष्ट्रिय-लोकतान्त्रिक-गठबन्धने एन्. डी. ए. सम्मिलितः। ए. आई. ए. डी. एम्. के. दलस्य

सचिवः एडप्पादी पलानीस्वामी चेन्नई-नगरे वार्ताहरसम्मेलने पी. एम्. के. प्रमुखेन अंबुमणि रामदास इत्यनेन सह एन्. डी. ए. मध्ये पी. एम्. के. इत्यस्य समावेशस्य घोषणाम् अकरोत्।

---------

फुटसल-स्पर्धा

आगामि षड्विंशत्यधिक द्विसहस्रतम वर्षस्य एस्. ए. एफ्. एफ्. फुटसल-चैम्पियन्शिप् स्पर्धायाः कृते भारतीय-पुरुष-महिला-दले बैङ्कोक-नगरे संप्राप्तवन्तौ। अग्रिमे सप्ताहे थाईलैण्ड्-देशस्य नोन्थाबुरी-नगरे अस्याः स्पर्धायाः आरंभः भविष्यति।